योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः १४

चतुर्दशः सर्गः १४

श्रीवसिष्ठ उवाच ।

संसारसागरासारकल्लोलैरुह्यमानया ।

मतेर्मानद मूकत्वं यया जनतयार्जितम् ।। १

आत्मलाभमयोदारकलाभिरिह सा मया ।

विचारोक्तिभिरेताभिः शास्त्रेऽस्मिन्नोपदिश्यते ।। २

न पश्यत्येव योऽत्यर्थं तस्य कः खलु दुर्मतिः ।

विचित्रमञ्जरी चित्रं संदर्शयति काननम् ।। ३ ।

कः कुष्ठघर्घरघ्राणं नानामोदविचारणे ।

मूर्खमात्मोपदेशेन प्रमाणीकुरुतेऽमतिः ।। ४ ।।

विपर्यस्तेन्द्रियं मत्तं मदिराघूर्णितेक्षणम् ।

धर्मनिर्णयसाक्षित्वे कः प्रमाणीकरोत्यधीः ।। ५ ।

कः शवं वा श्मशानस्थं समवायकथाशतम् ।

परिपृच्छति संदेहे कश्च मूर्खं प्रशास्ति च ।। ६

येनाशयबिलस्थोऽपि मूकोन्धोऽपि न निर्जितः ।

मनोव्यालः सदुर्बुद्धिः कथं नामोपदिश्यते ।। ७

जितमेव मनो विद्धि वस्तुतो यन्न विद्यते ।

निकटात्सा चिरास्तैव या शिला नैव विद्यते ।।

मनो न विजितं राम येनासदपि दुर्धिया ।

तेनाग्रस्तविषेणैव म्रियते विषमूर्च्छया ।। ९

ज्ञः पश्यति सदैवात्मा स्पन्दने प्राणशक्तयः ।

इन्द्रियाणि स्वधर्मेषु मनो राम किमुच्यते ।। १०

प्राणानां स्पन्दनी शक्तिर्ज्ञानशक्तिः परात्मनः ।

इन्द्रियाणां निजा शक्तिरेकः कोऽत्र निबध्यते ।। ११

सर्वास्तदंशवस्तस्य सर्वशक्तेः किलात्मनः ।

पृथक्ता वाच्यता चेयं कुतो नाम तवोत्थिता ।। १२

किं नाम जीव इत्युक्तं येनेहान्धीकृतं जगत् ।

चित्तं चैवासदेव त्वं विद्धि का तस्य शक्तता ।। १३

मनोनिर्दग्धदृष्टीनां दृष्ट्वा दुःखपरम्पराम् ।

मतिर्मे करुणाक्रान्ता राम मुग्धेव तप्यते ।। १४

कः किलात्र कुतः खेदो यन्मूर्खः परितप्यते ।

दुःखायैव हि जायन्ते करभाः प्राकृतास्तथा ।। १५

विनाशायैव जायन्ते जडा देहेष्वबुद्धयः ।

अनारतोदयाः पापा बुद्बुदा जलधेरिव ।। १६

कियन्तः पश्य पशवः प्रत्यहं प्रतिमण्डलम् ।

सूनावद्भिर्निहन्यन्ते कैवात्र परिदेवना ।। १७

अर्बुदान्यनिलो हन्ति क्षमाजातेषु चान्वहम् ।

दंशानां मशकानां च कैवात्र परिदेवना ।। १८

दिशं प्रति गिरीन्द्रेषु पुलिन्दाद्या वने वने ।

निघ्नन्ति मृगलक्षाणि कैवात्र परिदेवना ।। १९

जले जलचरव्यूहान्सूक्ष्मान्स्थूलो निकृन्तति ।

ग्रासार्थं निर्दयो मत्स्यः कैवात्र परिदेवना ।। २०

लिक्षामणुकणक्षामां क्षुधा खादति मक्षिका ।

तां कोशकारः क्षुधितो दंशस्तमपि चञ्चलम् ।। २१

तं दंशं दर्दुरो भुङ्क्ते व्यालस्तमपि दर्दुरम् ।

सर्पमुग्रं खगो हन्ति बभ्रुश्चैनं निकृन्तति ।। २२

बभ्रुं हिनस्ति मार्जारो मार्जारं श्वा निकृन्तति ।

ऋक्षः कौलेयकं हन्ति ऋक्षं व्याघ्रो निकृन्तति ।। २३

सिंहोऽभिभवति व्याघ्रं शरभः सिंहमत्ति च ।
शरभो नाशमायाति मत्तमेघविलङ्घने ।। २४
मेघा वातैर्विधूयन्ते वायवो गिरिभिर्जिताः ।
गिरयो वज्रनिष्पिष्टाः शक्रस्य वशगः पविः ।। २५
विष्णुना क्रियते शक्रो विष्णुर्गच्छति जन्तुताम् ।
सुखदुःखदशामेतां जरामरणपालिताम् ।। २६
जन्तवोऽपि महाकाया अपि विद्यायुधान्विताः ।
लिक्षाभिरङ्गलग्नाभिरुपजीव्यन्त एव हि ।। २७
अजस्रमेवमालूनविशीर्णं भूतजङ्गलम् ।
परस्परमलं मोहादद्यते रक्ष्यतेऽपि च ।। २८
अनारतं विनश्यन्ति विविधा भूतजातयः ।
अनारतं च जायन्ते लिक्षायूकापिपीलिकाः ।। २९
जलकोशेषु जायन्ते मत्स्येभमकरादयः ।
भूमावन्तः प्रजायन्ते कीटौघा वृश्चिकादयः ।। ३०
अन्तरिक्षेऽपि जायन्ते आकाशविहगादयः ।
वनवीथिषु जायन्ते सिंहव्याघ्रमृगादयः ।। ३१
प्राण्यङ्गेष्वपि जायन्ते विचित्राः ककुभं प्रति ।
स्थावरेष्वपि जायन्ते घुणा जघनकादयः ।। ३२
शिलान्तरेषु जायन्ते कीटभेकघुणादयः ।
विष्ठायामपि जायन्ते नानाकीटगणास्तथा ।। ३३
एवमेतेष्वसंख्येषु जन्मस्वपचयेषु च ।
अजस्रं करुणावन्तो नन्दन्तु प्ररुदन्तु वा ।। ३४
अनारतमृतावस्मिन्ननारतसमुद्भवे ।
संसारसंभ्रमे युक्ता न तुष्टिर्न च दुःखिता ।। ३५
पङ्क्तयस्त्वेवमेवेमा वृक्षपर्णगणैः समाः ।
उत्पत्योत्पत्य लीयन्ते भूतानां भूरिसंभवाः ।। ३६

यः प्रवृत्तः कुबुद्धीनां दयावान्दुःखमार्जने ।

स्वगतच्छत्रनिर्मृष्टसूर्यांशु खिद्यते नभः ।। ३७

न तिर्यक्समधर्माण उपदेश्या नरा भुवि ।

कथार्थकथनेनार्थः कः स्थाणुनिकटे वने ।। ३८

किं किल स्फारमनसां पशूनां च विशेषणम् ।

कृष्यन्ते पशवो रज्ज्वा मनसा मूढचेतसः ।। ३९

स्वचित्तपङ्कमग्नानां स्वनाशारब्धकर्मणाम् ।

मूर्खाणामापदं दृष्ट्वा प्ररुदन्त्युपला अपि ।। ४०

अनिर्जितात्मचित्तानां समन्ताद्दुःखदा दशाः ।

तन्मार्जनं कृतप्रज्ञो नाऽतः संप्रतिपद्यते ।। ४१

विनिर्जितात्मचित्तानां दुःखानि रघुनन्दन ।

सुविचार्याणि तेनात्र ज्ञातज्ञेयः प्रवर्तताम् ।। ४२

मनो नास्ति महाबाहो मा मुधोप प्रकल्पय ।

अनेन कल्पितेन त्वं वेतालेनेव हन्यसे ।। ४३

यावद्विस्मृतवानात्मतत्त्वं मूढो भवद्भवान् ।

तावत्तव मनोव्यालो बभूवाभ्युदितस्ततः ।। ४४

इदानीं भवता ज्ञातं यथाभूतमरिंदम ।

संकल्पाद्वर्धते चित्तं तदेवाशु परित्यज ।। ४५

दृश्यमाश्रयसीदं चेत्तत्सचित्तोऽसि बान्धवान् ।

दृश्यं संत्यजसीदं चेत्तत्सचित्तोसि मोक्षवान् ।। ४६

अयं गुणसमाहारो बन्धायैव समाश्रितः ।

संत्यक्तो भव मोक्षाय यथेच्छसि तथा कुरु ।। ४७

नाहं नेदमिति ध्यायंस्तिष्ठ त्वमचलाचलः ।

अनन्ताकाशसंकाशहृदयो हृदयेश्वरः ।। ४८

आत्मनो जगतश्चास्य त्वमङ्ग कलनामलम् ।

राम द्वित्वमयीं त्यक्त्वाशेषस्थः सुस्थिरो भव ।। ४९

आत्मनो जगतश्चान्तर्द्रष्टृदृश्यदशान्तरे ।
दर्शनाख्ये स्वमात्मानं सर्वदा भावयन्भव ।। ५०
स्वाद्यस्वादकसंत्यक्तं स्वाद्यस्वादकमध्यगम् ।
स्वादनं केवलं ध्यायन्नित्यमात्ममयो भव ।। ५१
रामानुभवनीयस्य तथानुभवितुः स्वयम् ।
अवलम्ब्य निरालम्बं मध्यं मध्ये स्थिरो भव ।। ५२
भवभावनया हीनं भावाभावदशोज्झितम् ।
भावयन्नेवमात्मानमात्मसंस्थः स्वयं भव ।। ५३
आत्मसत्तां त्यजन्नेतां चेत्यं भावयसि स्वयम् ।
यदा राम तदा यासि चित्ततामतिदुःखदाम् ।। ५४
चित्ततां शृङ्खलामेतां स्वरूपज्ञानयुक्तितः ।
बिलाच्चित्तान्महाबाहो स्वात्मसिंहं विमोचय ।। ५५
परमात्मदशां त्यक्त्वा चेत्यं परिपतन्नलम् ।
यदा गच्छसि संकल्पं चेत्यं संपश्यसे तदा ।। ५६
आत्मनो व्यतिरिक्तं सच्चित्तमित्यङ्ग संविदा ।
मनः संपद्यते दुःखि क्षीयते त्यक्तया तया ।। ५७
आत्मैवेदं जगत्सर्वमित्यन्तः संविदोदये ।
क्व चेता क्वच वा चित्तं किं चेत्यं चेतनं च किम् ।। ५८
अहमात्मेति जीवोऽस्मीत्येतावच्चित्तकं विदुः ।
अनेनेत्थमनाद्यन्तं दुःखं राघव तन्यते ।। ५९
अहमात्मा न जीवाख्याः सत्ताः सन्तीतराः क्वचित् ।
इत्येव चित्तोपशमः परमं सुखमुच्यते ।। ६०
आत्मैवेदं जगदिति जाते राघव निश्चये ।
असत्ता चेतसो जाता भवत्येव न संशयः ।। ६१
एवं सत्यावबोधेन स्वात्मैवेदमिति स्थितिः ।
मनः सुगलितं विद्धि सूर्यभासा तमो यथा ।। ६२

मनःसर्पः शरीरस्थो यावत्तावन्महद्भयम् ।

तस्मिन्नुत्सारिते योगाद्भयस्यावसरः कुतः ।। ६३

भ्रान्तिमात्रोत्थितश्चित्ते वेतालोऽतिबलोऽनघ ।

सम्यग्ज्ञानेन मन्त्रेण प्रसभं विनिपात्यताम् ।। ६४

देहगेहाद्गते चित्तयक्षे बलवतां वरे ।

निराधिर्विगतोद्वेगस्तिष्ठ नास्ति भयं तव ।। ६५

नीराग एव निरुपार्जन एव चास्मी-

त्येतावतैव गलिता तव चित्तसत्ता ।

निर्दुःखमुत्तमपदं परमं गतोऽसि

तिष्ठोपशान्तपरमैषण एवमन्तः ।। ६६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु उपशमप्रकरणे स्वचित्तनिरूपणं नाम चतुर्दशः सर्गः ।। १४ ।।